रक्तजमाह ।
'खर्जूरफलवर्णाभिः पिडकाभिर्निपीडितौ ।
रक्तोपसृष्टौ रुधिरं स्रवन्तौ शोणितप्रभौ ॥'
मांसजमाह ।
'मांसदुष्टौ गुरू स्थूलौ मांसपिण्डवदुद्गतौ ।
जन्तवश्चात्र मूर्च्छन्ति नरस्योभयतो मुखात् ॥'
जन्तवः कृमयः । मूर्च्छन्ति वर्द्धन्ते । मुखादुभयतः सृक्कण्योः ॥ * ॥ मेदोजमाह ।
'सर्पिर्मण्डप्रतीकाशौ मेदसा कण्डुरौ गुरू ।
स्वच्छस्फटिकसङ्काशमास्रावं स्रवतो भृशम् ॥'
अभिघातजमाह ।
'क्षतजाभौ विदीर्य्येते पाट्येते चाभिघाततः ।
ग्रथितौ च समाख्यातावोष्ठौ कण्डूसमन्वितौ ॥'
ग्रथितौ स्फुटिताविव । अतएव क्षतजाभौ रुधिराभाविति सङ्गतम् ॥ * ॥ अथौष्ठरोगाणां चिकित्सा ।
'गलदन्तमूलदशनच्छदेषु रोगाः कफास्र-
भूयिष्ठाः ।
तस्मादेतेष्वसकृद्रुधिरं विस्रावयेदुद्धृतम् ॥
चतुर्व्विधेन स्नेहेन मधूच्छिष्टयुतेन च ।
वातजेऽभ्यञ्जनं कुर्य्यान्नाडीस्वेदञ्च बुद्धिमान् ॥'
चतुर्व्विधेन स्नेहेन तैलघृतवसामज्जरूपेण ।

वेधं शिराणां वमनं विरेकं
तिक्तस्य पानं रसभोजनञ्च ।
शीताः प्रदेहाः परिषेचनञ्च
पित्तोपसृष्टेष्वधरेषु कुर्य्यात् ॥

शिरोविरेचनं धूमः स्वेदः कवल एव च ।
हृते रक्ते प्रयोक्तव्यं ओष्ठकोपे कफात्मके ॥
मेदोजे स्वेदिते भिन्ने शोधिते ज्वलनो हितः ।
प्रियङ्गु त्रिफला लोध्रं सक्षौद्रं प्रतिसारणम् ॥'
प्रतिसारस्य विधिमाह ।
'दन्तजिह्वामुखानां यच्चूर्णकल्कावलेहनैः ।
शनैर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् ॥
ओष्ठरोगेष्वशेषेषु दृष्ट्वा दोषमुपाचरेत् ।
तेषु व्रणत्वं यातेषु व्रणवत् समुपाचरेत् ॥'
अथ दन्तवेष्टरोगाः । तत्र दन्तवेष्टरोगाणां नामानि संख्याञ्चाह ।
'शीतादो गदितः पूर्व्वं दन्तपुप्पुटकस्तथा ।
दन्तवेष्टः शैशिरश्च महाशैशिर एव च ॥
ततः परिदरः प्रोक्तस्ततस्तूपकुशः स्मृतः ।
वैदर्भश्च ततः प्रोक्तः खलिवर्द्धन एव च ॥
अधिमांसकनामा च दन्तनाड्यश्च पञ्च च ।
दन्तविद्रधिरप्यत्र दन्तवेष्टेषु षोडश ॥'
तत्र शीतादस्य लक्षणमाह ।
'शोणितं दन्तवेष्टेभ्यो यस्याकस्मात् प्रवर्त्तते ।
दुर्गन्धीनि सकृष्णानि उत्क्लेदीनि मृदूनि च ।
दन्तमांसानि शीर्य्यन्ते पचन्ति च परस्परम् ।
शीतादो नाम स व्याधिः कफशोणितसम्भवः ॥'
दन्तवेष्टेभ्यः दन्तवेष्टनमांसेभ्यः । अकस्मात् अभिघातं विना शीर्य्यन्ते पतन्ति । पचन्ति च परस्परं पाकोष्मणा मांसानि शोणितं पचन्ति शोणितं मांसानि पचति ॥ दन्तपुप्पुटमाह ।
'दन्तयोस्त्रिषु वा यत्र श्वयथुर्जायते महान् ।
दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥'
दन्तवेष्टमाह ।
'स्रवन्ति पूयं रुधिरं चला दन्ता भवन्ति च ।
दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥'
अत्र दन्तमूलानीति कर्त्तृपदमध्याहरणीयम् ॥ शैशिरमाह ।
'श्वयथुर्दन्तमूलेषु रुजावान् कफवातजः ।
लालास्रावी कण्डुरश्च विज्ञेयः शैशिरो गदः ॥'
महाशैशिरमाह ।
'दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते ।
यस्मिन् स सर्व्वजो व्याधिर्महाशैशिरसंज्ञकः ॥'
तालु चाप्यवदीर्य्यते चकारात् दन्तवेष्टौ चाप्यवदीर्य्येते । सप्तरात्रात् मारकश्चायं यत आह भोजः । महाशैशिर इत्येष सप्तरात्रात् निहन्त्यसून् ॥ * ॥ परिदरमाह ।
'दन्तमांसानि शीर्य्यन्ते यस्मिन् स्रवति चाप्यसृक् ।
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥'
उपकुशमाह ।
'वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति हि ।
आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनम् ॥
आध्मायते स्रुते रक्ते मुखं पूति च जायते ।
यस्मिन्नुपकुशः स स्यात् पित्तरक्तसमुद्भवः ॥'
आघट्टिताः स्पृष्टाः ॥ * ॥ वैदर्भमाह ।
'घृष्टेषु दन्तमूलेषु संरम्भो जायते महान् ।
चलन्ति च रदा यस्मिन् स वैदर्भोऽभिघातजः ॥'
संरम्भः शोथः । चलन्ति चेति चकाराद्वेदनादाहपाकाः ॥ * ॥ खलिवर्द्धनमाह ।
'मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।
खलिवर्द्धनसंज्ञोऽसौ संजाते रुक् प्रशाम्यति ॥'
सञ्जाते दन्ते ॥ * ॥ अधिमांसकमाह ।
'हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः ।
लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः ॥
हानव्ये हनुभवे पश्चिमे दन्ते ॥ * ॥ पञ्चदन्तनाडीराह ।
'दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ।'
यथेरिता यथा नाड्योव्रणे वातपित्तकफसन्निपातागन्तुनिमित्ताः पञ्चनाड्यः कथितास्तथात्रापीत्यर्थः ॥ * ॥ दन्तविद्रधिमाह ।
'दन्तमांसमलैः साश्रैर्बाह्यान्तःश्वयथुर्महान् ।
सदाहरुक् स्रवेद्भिन्नः पूयास्रं दन्तविद्रधिः ॥'
दन्तमांसमलैः दन्तवेष्टगतदोषैः । सास्रैः सरक्तैर्हेतुभिः ॥*॥ अथ दन्तवेष्टरोगाणां चिकित्सा ।
'शीतादे हृतरक्ते तु तोये नागरसर्षपान् ।
निष्क्वाथ्य त्रिफलाञ्चापि कुर्य्याद्गण्डूषधारणम् ॥
'कासीसलोध्रकृष्णामनःशिलाप्रियङ्गुतेजोह्वाः ।
एषां चूर्णं मधुयुक् शीतादे पूतिमांसहरम् ॥'
तेजोह्वा तेजवल्कल इति लोके ।
'तैलं घृतं वा वातघ्नं शीतादे संप्रशस्यते ।'*।
'दन्तपुप्पुटके कार्य्यं तरुणे रक्तमोक्षणम् ॥
सपञ्चलवणः क्षारः सक्षौद्रः प्रतिसारणम् ।
शिरोविरेकश्च हितो नस्यं स्निग्धञ्च भोजनम् ॥
विस्राविते दन्तवेष्टे व्रणांस्तु प्रतिसारयेत् ।
लोध्रपत्तङ्गमधुकलाक्षाचूर्णैर्मधुप्लुतैः ॥'
प्रतिसारयेत् अङ्गुल्या घर्षयेत् । पत्तङ्गं चोचकं इति लोके ।
'गण्डूषे क्षीरिणो योज्याः सक्षौद्रघृतशर्कराः ।
चलदन्तस्थैर्य्यकरं कार्य्यं बकुलचर्व्वणम् ॥
भद्रमुस्ताभयाव्योषविडङ्गारिष्टपल्लवैः ।
गोमूत्रपिष्टैर्गुटिकां छायाशुष्कां प्रकल्पयेत् ॥
तां निधाय मुखे शोयशूलदन्तातुरो नरः ।
नातःपरतरं किञ्चिच्चलदन्तस्य भेषजम् ॥'
भद्रमुस्तादिवटिका ।

'तुला घृतं नीलसहाचरस्य
द्रोणाम्भसा संश्रपयेद्यथावत् ।
ततश्चतुर्भागरसेन तैलं
पचेच्छनैरर्द्धपलप्रमाणैः ॥
कल्कैरनन्ताखदिरारिमेद-
जम्ब्वाम्रयष्टीमधुकोत्पलानाम् ।
तत्तैलमाश्वेव धृतं मुखेन
स्थैर्य्यं द्विजानां विदधाति सद्यः ॥'

नीलसहाचरः नीलपुष्पकटरैया । अनन्ता दुरालभा तदलाभे यवासो ग्राह्यः । अरिमेदो दुर्गन्धखदिरः । सहाचराद्यतैलम् ॥ * ॥
'शैशिरे हृतरक्ते तु लोध्रमुस्तारसाञ्जनैः ।
सक्षौद्रैः शस्यते लेपो गण्डूषे क्षीरिणो हिताः ॥
क्रियां परिदरे कुर्य्याच्छीतादोक्तां विचक्षणः ।
संशोध्योभयतः कायं शिरश्चोपकुशे तथा ॥
काकोदुम्बरिकापत्रैर्व्रणं विस्रावयेद्भिषक् ।
लवणैः क्षौमयुक्तैश्च सक्षौद्रैः परिसारयेत् ॥*॥
'शस्त्रेणोत्कृत्य वैदर्भं दन्तमूलानि शोधयेत् ।
ततः क्षारं प्रयुञ्जीत क्रियाः सर्व्वाश्च शीतलाः ॥
उद्धृत्याधिकदन्तन्तु ततोऽग्निमवचारयेत् ।
कृमिदन्तकवच्चात्र विधिः कार्य्यो विजानता ॥'
इयं खलिवर्द्धनस्य चिकित्सा ॥ * ॥
'छित्त्वाधिमांसं सक्षौद्रैरेतैश्चूर्णैरुपाचरेत् ।
वचातेजोवतीपाठास्वर्ज्जिकायावशूकजैः ॥'
तेजोवती तेजवल्कलं स्वर्ज्जीवन्तीति च ।
'क्षौद्रद्वितीयाः पिप्पल्यः कवले चात्र कीर्त्तिताः ।
पटोलनिम्बत्रिफलाकषायश्चात्र धावने ॥'*॥
'नाडीव्रणहरं कर्म्म दन्तनाडीषु कारयेत् ।
यद्दन्तमध्ये जायेत नाडीदन्तं तदुद्धरेत् ॥
छित्त्वा मांसानि शस्त्रेण यदि नोपरिगो भवेत् ।
उद्धृत्य च दहेच्चापि क्षारेण ज्वलनेन वा ॥
भिन्नस्तूपेक्षिते दन्ते हनुकास्थिगतं ध्रुवम् ।
समूलं दशनं तस्मादुद्धरेद्भग्नमस्थि च ॥
उद्धृते तूत्तरे दन्ते शोणितं प्रस्रवेदति ।
रक्तातिषेकात् पूर्व्वोक्ता घोरा रोगा भवन्ति हि ॥
काणः संजायते जन्तुरर्द्दितं तस्य जायते ।
चलमप्युत्तरं दन्तमतो नैवोद्धरेद् भिषक् ॥
धावनं जातिमदनस्वादुकण्टकखादिरैः ।"
कषायैरितिशेषः ।
कषायैर्जातिमदनकटुका-स्वादुकण्टकैः ।